# Navaratnamalika Ambikastutih

# નવરત્નમાલિકા અમ્બિકાસ્તુતિઃ

## Document Information

Text title : navaratnamAlikA ambikAstutiH

File name : navaratnamAlikA.itx

Category : devii, pArvatI, devI, nava

Location : doc_devii

Author : narakaNThIravashAstri

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : shrIkAlahastikShetrasthajnAnaprasUnAmbikAstutiH, from Malayamaruta 4 pages 5-6

Latest update : August 18, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નવરત્નમાલિકા અમ્બિકાસ્તુતિઃ

(શ્રીકાલહસ્તિક્ષેત્રસ્થજ્ઞાનપ્રસૂનામ્બિકાસ્તુતિઃ)
શ્રીનરકણ્ઠીરવશાસ્ત્રિવિરચિતા ।

શ્રીનાકનાથમુખનાનાસહસ્રસુરસેનાગ્રમૌલિવલભી-
સૂનાવલીબહુલલીનાલિનીમધુરગાનાઞ્ચિતાઙ્ઘ્રિનલિના ।
માનાતિલઙ્ઘિમહિમાનાદિરાનતજનાનામનેકફલદા
જ્ઞાનામ્બિકા ભવતુ દીનાવની કુશલદાનાય મે ભગવતી ॥ ૧॥

રાકાશશાઙ્કરુચિરાકારચારુપાદના(પતદા)કાશસિન્ધુલહરી-
નીકાશસૂક્તિસરણીકારિણી પ્રકૃતિમૂકાત્મનામપિ નૃણામ્ ।
પાકાહિતપ્રમુખનાકાલયપ્રકરશોકાપનોદનચણા
શ્રીકાલહસ્તિનગરૈકાયનાવતુ પિનાકાયુધસ્ય દયિતા ॥ ૨॥

શ્રેણીભવદ્વિષદેણીદૃગુલ્લસિતવેણીપિનદ્ધસુમનો-
દ્રોણીમરન્દરસવેણીપ્રસારભૃશશોણીકૃતાઙ્ઘ્રિકમલા ।
શ્રોણીનટત્સરકૃપાણીમનોજ્ઞઘનવેણી કૃપાર્દ્રહૃદયા
ક્ષોણીધરેન્દ્રતનયાણીયસીમપિ ચ વાણીં પ્રગલ્ભયતુ મે ॥ ૩॥

કેલીસમાકલિતતાલીદલશ્રવણપાલીવિભૂષણમણી-
વા(પા)લી મદોદ્ધતમરાલીગતિર્દિશતુ નાલીકદીર્ઘનયના ।
ચૂલીતલાભરણનાલીકવૈરિશકલાલીભવત્સુરવધૂઃઽ
કાલી ગિરં મૃદુ મૃણાલીભુજા મમ મધૂલીરસોર્મિમધુરામ્ ॥ ૪॥

હૃદ્યાનવદ્યતરગદ્યાનુબદ્ધમૃદુપદ્યાભિરૂપકવિતાં
દદ્યાજ્જગન્મહિતવિદ્યાં ત્રયીશિખરવેદ્યા હિમાદ્રિતનયા ।
આદ્યા પરા મમ શરદ્યામિનીશભૃદવિદ્યાવિલાસશમની
વિદ્યાધરી સમભિવાદ્યા જ્વલન્મણિનિષદ્યાયમાણરશના ॥ ૫॥

હાલામદાકલિતહેલાલસદ્બહુલલોલારુણાક્ષિયુગલી
લીલાપિનદ્ધસુરસાલાવલીપ્રસવમાલાસુગન્ધચિકુરા ।

કૈલાસનાથહિતશીલા કરાઞ્ચિતશુકાલાપલોલહૃદયા
વેલાતિલઙ્ઘિશુભજાલાય મે ભવતુ શૈલાધિનાથતનયા ॥ ૬॥

ચણ્ડાપદાનયુતચણ્ડાભિધાસુરપિચણ્ડાવદારણચણા
ભણ્ડાસુરોગ્રભુજદણ્ડાગ્રનિર્દલનશૌણ્ડાયુધોદ્ધતકરા ।
શુણ્ડાનુકારિકરકાણ્ડાવદીર્ણજગદણ્ડાટ્ટહાસભયદા
દણ્ડાયુધાય શશિખણ્ડાવતંસિતશિખણ્ડા ન ચાર્પયતુ મામ્ ॥ ૭॥

હુઙ્કારનિર્ગલદશઙ્કાપતદ્દ્વિષદહઙ્કારમારતિમિરાં
અઙ્કાન્તલમ્બિસિતકઙ્કાલહારસદલઙ્કારબન્ધુરગલામ્ ।
હ્રીઙ્કારિણીં ભયદટઙ્કારકાર્મુકકરાં કાલહસ્તિનિલયાં
પઙ્કાપહામપકલઙ્કાવતંસહરિણાઙ્કાં ભજે ભગવતીમ્ ॥ ૮॥

કણ્ઠારવોદ્યદુપકણ્ઠારિદુર્વિષહકણ્ઠીરવેન્દ્રગમનો-
ત્કણ્ઠા નિકામશિતિકણ્ઠાનુકર્ષિકલકણ્ઠાનુલાપલલિતા ।
શુણ્ઠીભવદ્દનુજકણ્ઠીરવપ્રકરકુણ્ઠીકૃતિક્ષમબલા
કુણ્ઠીકરોતુ નરકણ્ઠીરવાખ્યકવિકણ્ઠીરવસ્ય દુરિતમ્ ॥ ૯॥

શ્રીકાલહસ્તિનિલયજ્ઞાનપ્રસવામ્બિકામુદે રચિતા ।
નરકણ્ઠીરવકૃતિના નવરત્નસ્તુતિરિયં ચિરં જયતુ ॥ ૧૦॥

॥ ઇતિ શ્રીનરકણ્ઠીરવશાસ્ત્રિવિરચિતા નવરત્નમાલિકા સમાપ્તા ॥

શ્રીનરકણ્ઠીરવશાસ્ત્રિ કવિરયં આન્ધ્રો વટ્ટિયલ્લિવંશીયઃ
૧૯-શતકાન્તે મદ્રાસ-નગરાન્નતિદવીયસિ કાર્વેટિનગરનામ્નિ સ્થલે
તદધીશસ્ય બોમ્મરાજસ્યાસ્થાનકવિરાસીત્ । અસ્ય પૌત્રા અદ્યાપિ જીવન્તિ ।
અસ્ય કૃતય -
૧ અભિનવાસવદત્તા (સુબન્ધુકૃત-વાસવદત્તાગદ્યકાવ્યસ્ય પદ્યૈઃ સઙ્ગ્રહઃ),
૨ યતિસાર્વભૌમોપહારઃ (શ્રીશઙ્કરાચાર્યપારમ્પર્યવર્ણનમ્)
૩ કપિલેશ્વરસ્તુતિઃ (તિરુપ્પતિક્ષેત્રસ્થશિવસ્તુતિઃ); ગૈર્વાણ્યાં (૪-૧૧, ૧૫-૧૧-૬૬) મુદ્રિતા ।-
૪ જ્ઞાનપ્રસૂનામ્બિકા નવરત્નમાલિકા (અત્ર મુદ્યમાણા)।
એતા અદ્ય ઉપલભ્યન્તે । કેચન શાસ્ત્રગ્રન્થાશ્ચાનેન રચિતાઃ ।
નવરત્નમાલિકાયા માતૃકા અડ્યાર-કોશાગારેડપ્યુપલભ્યતે । ઇયં
ક્વચિદન્યત્ર મુદ્રિતેતિ શ્રૂયતે, કિન્તુ અપ્રસિદ્ધા દુર્લભા ચ ।

Encoded and proofread by Sunder Hattangadi

*Navaratnamalika Ambikastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*